# Mushakaga Stuti Naradamunikrita

# નારદમુનિકૃતા મૂષકગસ્તુતિઃ

## Document Information

Text title : Mushakaga Stuti Naradamunikrita

File name : mUShakagastutiHnAradamunikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 21 | 5.21. 31-44||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# નારદમુનિકૃતા મૂષકગસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
સર્વેષાં ભોગભોક્ત્રે મૂષકગાય નમો નમઃ ।
સર્વદેવાધિદેવાય ગણેશાય નમો નમઃ ॥ ૩૧॥
લમ્બોદરાય વિઘ્નાનાં નાયકાય પરાત્મને ।
ભક્તાનાં વિઘ્નહર્ત્રે તે વિઘ્નદાત્રે દુરાત્મનામ્ ॥ ૩૨॥
હેરમ્બાય નમસ્તુભ્યં ભક્તવત્સલરૂપિણે ।
સ્વાનન્દવાસિને ચૈવ પરેશાય નમો નમઃ ॥ ૩૩॥
મહોદરાય પૂજ્યાય સર્વેષાં સર્વરૂપિણે ।
સર્વાદિપૂજ્યકાયૈવ વક્રતુણ્ડાય તે નમઃ ॥ ૩૪॥
ત્રિનેત્રાય ચતુર્હસ્તકમલસ્ય ધરાય તે ।
મૂષકોપરિસંસ્થાય જ્યેષ્ઠરાજાય તે નમઃ ॥ ૩૫॥
અમેયાય ગણાધ્યક્ષ શૂર્પકર્ણપ્રધારિણે ।
સર્વેશાય નમસ્તુભ્યં બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૩૬॥
અનાદયે તથા મધ્યે નાનારૂપધરાય તે ।
અન્તે તાદૃશરૂપાય ત્રિસ્વરૂપાય વૈ નમઃ ॥ ૩૭॥
શેષપુત્રાય શૈવાય પારાશર્યાય તે નમઃ ।
સર્વેષાં જનકાયૈવ માત્રે બ્રહ્મેશ તે નમઃ ॥ ૩૮॥
સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે ગણેશાય નમો નમઃ ।
શાન્તિરૂપાય શાન્તિભ્યઃ શાન્તિદાય નમો નમઃ ॥ ૩૯॥
અપારગુણધારાય યોગિનાં હૃદિ સંસ્થિત ।
તત્ કિં સ્તુમો નઃ પ્રસીદ ગણાધીશ નમો નમઃ ॥ ૪૦॥
એવં સ્તુત્વા ગણેશાનં પ્રણેમુસ્તે સુરર્ષયઃ ।
પ્રસન્નાત્મા મૂષકગસ્તાનુવાચ પ્રહર્ષિતઃ ॥ ૪૧॥
(ફલશ્રુતિઃ)

મૂષકગ ઉવાચ ।
કૃતં મે સ્તવનં સર્વૈર્ભવદ્ભિઃ સર્વદં ભવેત્ ।
યદ્યદિચ્છથ તત્તદ્દાસ્યામિ વૈ ભક્તિતન્ત્રિતઃ ॥ ૪૨॥
પઠતાં શ‍ૃણ્વતાં નિત્યં સ્વાધીનોઽહં ભવામિ ચ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં પુત્રપૌત્રાદિવર્ધનમ્ ॥ ૪૩॥
વરં વૃણુત દેવેશા દેવા મુનિસમન્વિતાઃ ।
દાસ્યામિ સ્તોત્રતુષ્ટોઽહં વાઞ્છિતં નાત્ર સંશયઃ ॥ ૪૪॥

ઇતિ નારદમુનિકૃતા મૂષકગસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૨૧ । ૫.૨૧। ૩૧-૪૪॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 21 . 5.21. 31-44..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Mushakaga Stuti Naradamunikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*